ॐ

॥ श्रीः ॥

## ॥ शान्तिमन्त्राः ॥

सर्वे भवन्तु सुखिनः
सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु
मा कश्चित् दुःखभाग्भवेत् ।।

काले वर्षतु पर्जन्यः
पृथिवी सस्यशालिनी ।
देशोऽयं क्षोभरहितः
ब्राह्मणास्सन्तु निर्भयाः ।।

स्वस्ति प्रजाभ्यः परिपालयन्तां
न्याय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं
लोकाः समस्तास्सुखिनो भवन्तु ।।

असतो मा सद्गमय । तमसो मा ज्योतिर्गमय ।
मृत्योर्मा अमृतं गमय ।। ओं शान्तिः शान्तिः शान्तिः।।

